# श्रीमद् भागवत रसिक कुटुंब

## मार्ग बंधु स्तोत्र

अप्पय्यदीक्षितेन्द्रैः विरचितम्

शम्भो महादेव देव शिव शम्भो महादेव
देवेश शम्भो शम्भो महादेव देव।।

फालावनम्रत्किरीटं फालनेत्रार्चिषा दग्धपञ्चेषुकीटम् ।
शूलाहतारातिकूटं शुद्धमर्धेन्दुचूडं(म्) भजे मार्गबन्धुम् ।।1।।

अङ्गे विराजद्भुजङ्गं अभ्रगङ्गातरङ्गाभिरामोत्तमाङ्गम् ।
ओंकारवाटीकुरङ्गं सिद्धसंसेविताङ्घ्रिं भजे मार्गबन्धुम् ।।2।।

नित्यम् चिदानन्दरूपं निह्नुताशेषलोकेशवैरिप्रतापम् ।
कार्तस्वरागेन्द्रचापं कृत्तिवासं भजे दिव्यसन्मार्गबन्धुम् ।।3।।

कन्दर्पदर्पघ्नमीशं कालकण्ठं महेशं महाव्योमकेशम् ।
कुन्दाभदन्तं सुरेशं कोटिसूर्यप्रकाशं भजे मार्गबन्धुम् ।।4।।

मन्दारभूतेरुदारं मन्थरागेन्द्रसारं महागौर्यदूरम् ।
सिन्दूरदूरप्रचारं सिन्धुराजातिधीरं भजे मार्गबन्धुम् ।।5।।

अप्पय्ययज्वेन्द्र गीतं स्तोत्रराजं पठेद्यस्तु भक्त्या प्रयाणे ।
तस्यार्थसिद्धिं प्रदत्ते मार्गमध्येऽभयं चाशुतोषो महेशः ।।6।।

इति श्रीअप्पय्यदीक्षितेन्द्रैः विरचितं मार्गबन्धुस्तोत्रम् सम्पूर्णम् ।